# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा -शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम्-६ | गुणाः - ७० |
| विषयः - फलितज्यौतिषम् । | (C.C.- 3.5.10. OLD ) | समयः ३:०० तः ६:०० |
| दिनाङ्कः - १५/१०/२०१९ | सन्दर्भग्रन्थः-सरलजन्मपत्रीविज्ञानम् । | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(अ) ललितानि स्निग्धानि भ्रमरश्यामानि देहेरोमाणि ।
जायन्ते भूमिभुजां मृदूनि विलसन्ति सूक्ष्माणि ॥

(ब) बिम्बाधरोधनाढ्यः प्रज्ञावान् पाटलाधरो भवति ।
प्रायो राज्यं लभते प्रवालवर्णाधरस्तु नरः ॥

(क) यस्य सदण्डं छत्रं चामरयुग्मं प्रतिष्ठितं पाणौ ।
साऽम्बुधिरशनावसनां भुनक्तिभूमिभुजिष्योऽपि ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(अ) अङ्गरूपोपाङ्गलक्षणम् ।

(ब) विवाहसंख्यापुत्रपुत्रीभ्राताभगिनीसूचकरेखाश्च ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(अ) अत्रुटिताग्राः स्निग्धाः ऋजवो मृदवः समास्तनीयांसः ।
अस्तोकदीर्घवहवस्तरङ्गिणोभूभुजां केशाः ॥

(ब) मृदुरोमा मृदुगात्री मृदुकोपा मृदुशिरोरुहा रमणीं
मृदुभाषिणीं अगण्यैः पुण्यैरासाद्यते सद्यः ॥

(क) वीणावेणुनिनादाः कोकिलहंसस्वराः पयोदरवाः ।
केकिध्वनयो भुवने भवंति ललना नृपतिपत्न्यः ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(अ) स्त्रीगतिविचारः ।

(ब) मुखोष्ठलक्षणफलञ्च ।

## तृतीयान्विति:

**प्रश्न: ५ अधोलिखितेभ्य: कयोश्चित् द्वयो: सान्वयं व्याख्यां करोतु । १०**

(अ) प्राची प्रतीची माहशी कौवेरी दिक् शुभावहा ।
अप्राची राक्षसी दुष्टा शून्याग्नेयी च मारुती ॥

(ब) स्वांशे विलग्ने यदि वा त्रिकोणे
स्वांशे स्थित: पश्यतिधातुचिन्ताम् ।
परांशकस्थश्च करोति जीवं
मूलं परांशोपगत: परांशम् ॥

(क) गुरुरविसौम्यैर्दृष्टस्त्रिसुतमदायारिग: शशी लग्नात् ।
भवति च विवाहकर्ता त्रिकोणकेन्द्रेषु वा सौम्या: ॥

**प्रश्न: ६ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखत । १०**

(अ) प्रश्नाध्याये वर्ण्यविषया: ।

(ब) सन्तानसम्बन्धिप्रश्न: ।

## संयुक्तान्विति:

**प्रश्न: ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) कस्यामङ्गुल्या: मूले शनिग्रह: भवति ?

(२) शत्रुरेखास्थानं कुत्र भवति ?

(३) कस्यामङ्गुल्या: मूले सूर्यरेखा भवति ?

(४) वृषभसदृशदीर्घैवं मांसरहितस्कन्ध: भवति चेत् जातक: किं कार्यं करोति ?

(५) मंदगतिचारिणीस्त्रीफलम् किम् ?

(६) हिरणवत् गतिचारिणीस्त्रीफलम् किम् ?

(७) शीघ्रगतिगामिनीस्त्रिफलं किम् ?

(८) पीननितम्बपीनस्तनैवं पीनकपोलस्त्रिफलं किम् ?

(९) लग्नभावात् किं किं विचार्यते ?

(१०) सप्तमस्थानात् किं किं विचार्यते ?

(११) चन्द्र: कस्मिन् राशौ पूर्वदिशायां भवति ?

(१२) यदि लग्ने पापग्रह: भवति चेत् सर्वावस्थायां वादिविजयं भवति न वा ?

(१३) प्रश्नकाले नीचग्रहा:, अस्त व नीचस्थानगता: भवन्ति चेत् शत्रोपरिविजयं प्राप्यते न वा ?

(१४) अस्यामभ्यासक्रमे प्रथमाध्यायस्य नाम किम् ?

(१५) जठरं यस्य अभित: समं स्याद् स-जातक: कथं भवति ?

----oooo----